## Shastri I^st Year II^nd Sem- Keynotes

## पञ्चदशी - चित्रदीपप्रकरणम्

1. चित्रपटे कति अवस्थाः सन्ति? ते के?
   चत्वारः। ते धौतः, घट्टितः, लाञ्छितः, रञ्जितः च।

   यथा धौतो घट्टितश्च लाञ्छितो रञ्जितः पटः ।
   चिदन्तर्यामी सूत्रात्मा विराट् चात्मा तथेर्यते ।।2।।

2. धौतः - धौतः स्वतः शुभ्रो - शुद्धः । अत्र अवस्थासु मध्ये द्रव्यान्तर संबन्धं विना शुभ्रः धौतः इत्युच्यते।
3. घट्टितः - शुभ्रः वस्त्रः अन्नविलेपनेन घट्टितः इत्युच्यते। अर्थात् अन्नेन लिप्तो धौतः घट्टितः स्यात्।
4. लाञ्छितः – अन्नविलेपनानन्तरं तूलिकामाध्यमेन मष्याकारैः युक्तः लाञ्छितः स्यात्।
5. रञ्जितः – मष्याकारैः वर्णपूरणेन रञ्जितः भवेत्।

   स्वतः शुभ्रोऽत्र धौतः स्याद्घट्टितोऽन्नविलेपनात् ।
   मष्याकारैर्लाञ्छितः स्याद्रञ्जितो वर्णपूरणात् ।।3।।

6. चित्रपटवत् परमात्मनि कति अवस्थाः सन्ति? ते के?
   चत्वारः। ते चित् अन्तर्यामी सूत्रात्मा विराट् च।

   स्वतश्चिदन्तर्यामी तु मायावी सूक्ष्मसृष्टितः ।
   सूत्रात्मा स्थूलसृष्ट्यैव विराडित्युच्यते परः ।।4।।

7. चित् – स्वतः- परमात्मा मायातत्कार्यरहितः।
8. अन्तर्यामी - परमात्मा मायायोगात् अन्तर्यामी इत्युच्यते। । अर्थात् माया प्रतिबिम्बितचैतन्यः अन्तर्यामी अथवा ईश्वरः इत्युच्यते।
9. सूत्रात्मा – समष्टि सूक्ष्मशरीराभिमानि सूत्रात्मा इत्युच्यते। अर्थात् अपञ्चीकृत-भूतकार्य-समष्टि-सूक्ष्मशरीर-योगात् सूत्रात्मा स्यात्। ।
10. विराट् - पञ्चीकृत-भूतकार्य-समष्टि-स्थूलशरीर-उपाधियोगात् विराट् इत्युच्यते। अर्थात् समष्टि स्थूलशरीराभिमानि विराट् इत्युच्यते।
11. अविद्या – का ? अयं संसारः परमार्थः। अयं च आत्मवस्तुनि संल्लग्नः इति भ्रान्तिः अविद्या।

    संसारः परमार्थोऽयं संल्लग्नः स्वात्मवस्तुनि।
    इति भ्रान्तिरविद्या स्याद्विद्ययैषा निवर्तते ।।10।।

12. अविद्या केन निवर्तते ? विद्यया निवर्तते ।
13. अविद्या कति विधा ? विद्या द्वेधा । आवृतिः विक्षेपः च।
14. का विद्या ? अयं संसारः आत्माभासस्य – चिदाभासस्य जीवस्य न आत्मवस्तुनः इति ज्ञानं विद्या भवेत्। परमात्मविषयकब्रह्मज्ञानं एव विद्या।

    आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः ।
    इति बोधो भवेद्विद्या लभ्यतेऽसौ विचारणात् ।।11।।

15. विद्या कति विधा ? विद्या द्वेधा । परोक्षा अपरोक्षा च।

    अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् ।
    अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते

16. परोक्षविद्या – ब्रह्म अस्ति इति यत् ज्ञानं भवति तत् ज्ञानमेव परोक्षविद्या इत्युच्यते। परोक्षविद्या ब्रह्मनिष्ठः गुरुमुखात् श्रुतं तत्वमस्यादि महावाक्योल्पन्नं परोक्ष ब्रह्म विषयकज्ञानं ज्ञानपूर्वकमपिकृतम् सर्वं पापम् अग्निवद् दहति।

17. अपरोक्षा विद्या – अहं ब्रह्म इति यत् ज्ञानं भवति तत् ज्ञानमेव अपरोक्षविद्या इत्युच्यते। तत्साक्षातकारः सिद्ध्यर्थम् आत्मतत्वं विविच्यते। येन अयं संसारात् विमुच्यते। ब्रह्मनिष्ठः गुरुमुखात् श्रुतं शास्त्रोपदेशजनितं अपरोक्षज्ञानमिदं जन्मादि संसारहेतुभूतम् अज्ञानान्धकारं सूर्यवत् दहति।

18. व्यवहारदशायाम् आकाशः कति विधः? चत्वारः। घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा ।

19. घटाकाशः- घट मध्यस्थ- घटावच्छिन्नः खे- आकाशः घटाकाशः इत्युच्यते ।

20. महाकाशः- यत् घटाकाशः अनवच्छिन्नः आकाशः तत् महाकाशः इत्युच्यते।

21. जलाकाशः – घटावच्छिन्नः आकाशे यत् नीरं- उदकं अस्ति तत्र प्रतिबिम्बितः अभ्रनक्षत्रसहितः आकाशो जलाकाशः इति उदीर्यते ।

22. अभ्रखः/अभ्राकाशः - महाकाशस्य मध्ये यत् मेघमण्डलम् ईक्ष्यते। तत् मेघमण्डले यत् जलं तस्मिन् जले प्रतिबिम्बताकाशः मेघाकाशः इत्युच्यते।

23. व्यवहारदशायाम् आकाशवत् चैतन्यं कति विधः? चत्वारः। कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा ।

24. कूटस्थः – पञ्चीकृतऽपञ्चीकृत भूतकार्यत्वेन स्थूलसूक्ष्मरूपस्य देहद्वयस्य अधिष्ठानतया अविद्याकल्पितस्य देहद्वयावच्छिन्नात्मा एव कूटस्थः इत्युच्यते।

25. ब्रह्म – परमात्मचैतन्यम्। सत्यं ज्ञानं अनन्तं ब्रह्म। सच्चिदानन्दस्वरूपं ब्रह्म।

26. जीवः- कूटस्थे कल्पितबुद्धिः चित्प्रतिबिम्बकत्वेन प्राणानां धारणात् जीवः इत्युच्यते।

27. ईशाः – मायोपहितं सर्वज्ञादि विशिष्ट परमात्मचैतन्यम् ईश्वरः इत्युच्यते।

28. अध्यासः कः? यथा जलव्योम्ना घटाकाशः तिरोहितः तथा जीवेन कूटस्थः तिरोहितः। एवं वस्तुनि अन्योन्यवस्तु आरोपः अध्यास इत्युच्यते।

29. अध्यासः कति विधः? द्विविधः । विक्षेपाध्यासः तादात्माध्यासः च।

30. विक्षेपाध्यासः – अविद्यावृतकूटस्थे आरोपित स्थूलसूक्ष्मरूपदेहद्वयसहितः चित् आभासः विक्षेपाध्यासः । यथा शुक्तौ रजतारोपः।

    शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यास एव हि

31. तादात्माध्यासः/अन्योन्याध्यासः- यथा घटाकाशः जलाकाशेन आच्छादितः भवति तथा कूटस्थोऽपि जीवेन आवृतो भवति। अयमेव जीवेन कूटस्थस्य आवृतभावः तिरोहितभावः तादात्माध्यासः/अन्योन्याध्यासः इत्युच्यते।

32. अविद्यावृति केन नश्यति ? अविद्यावृतितादात्म्यः विद्यया एव नश्यति ।

33. मूलाविद्या का ? अयं जीवः न कूटस्थः इति अनादिरविवेकः मूलाविद्या इत्युच्यते।

**आत्मस्वरूपविषये विप्रतिपत्ययः**

34. देहः आत्मा इति के वदन्ति ? सिद्धान्तं साधयत।

    कूटस्थादिशरीरान्तसंघातः देहः आत्मा इति प्रत्यक्षाभासमाश्रिताः लोकायताः पामराश्च वदन्ति । जीवात्मा यथा निर्गमनं करोति तथा देहस्य मरणावस्था दर्शनात् लोकायताः देहः आत्मा इति वदन्ति ।

35. प्राणः आत्मा इति के वदन्ति ? सिद्धान्तं साधयत।

    हैरण्यगर्भाः प्राणात्मवादिनः। चक्षुराद्यक्षलोपेऽपि प्राणसत्त्वे तु जीवति अतः प्राणः आत्मा इति।

36. मनः आत्मा इति के वदन्ति ? सिद्धान्तं साधयत।?

37. मन आत्मेति उपासनपरा जनाः मन्यन्ते । मन एव मनुष्याणां कारणं बन्धमोक्षयोःकारणम्। मनसः भोक्तृत्वं अपि अस्ति। मनोमयः कोशस्तेनात्मेतीरितं मनः इति श्रुतिः प्रमाणत्वेन स्वीकरोति ते।

38. अहंवृत्तिरिदंवृत्तिरित्यन्तःकरणं द्विधा।

39. विज्ञानम् आत्मेति के वदन्ति ? सिद्धान्तं साधयत।?
क्षणिकवादिनः। यतो विज्ञानमूलत्वं मनसो गम्यते स्फुटम्।

40. विज्ञानम् आत्मा न भवितुमर्हति कुतः?
विज्ञानं विद्युदभ्रनिमेषवत् क्षणिकं अतः विज्ञानं नात्मा।

41. शून्यम् आत्मा इति के वदन्ति ? सिद्धान्तं साधयत।?
अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः।

42. वैदीकदर्शनमते आत्मा कीदृशः?
अस्तीत्येवोपलब्धव्यस्तत्वभावेन- इति श्रुति न्यायात् आनन्दमयः आत्मा इति वैदीकाः उच्यते।

43. अणु परिमाणः आत्मेति के वदन्ति ? सिद्धान्तं साधयत।?
अन्तरालाः अणु परिमाणः आत्मेति वदन्ति। यतः अयमात्मा सूक्ष्मनाडीकृत रोम्णः सहस्रभागेऽपि तिष्ठति।

44. मध्यमः परिमाणः आत्मेति के वदन्ति ?
दिगम्बराः मध्यमः परिमाणः आत्मेति वदन्ति। यतः अयमात्मा आपादमस्तकम् व्याप्तम्। चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि।

45. आत्मनः च चिद्रूपताम् वेदान्तिनः अङ्गीकरोति।

46. प्राभाकराः तार्किकाः च आत्मनः अचिद्रूपताम् अङ्गीकरोति।

47. आकाशवत् द्रव्यमात्मा इति तार्किकाः वदन्ति। आकाशस्य शब्दादि गुणवत् इच्छा द्वेष प्रयत्न धर्माधर्मौ सुखासुखाः तत्संस्काराश्च तस्यैते गुणाः आत्मनः।

48. सांख्यमते प्रकृतिः का ? त्रिगुणात्मिका प्रकृतिः जाड्यांशः महतः परमव्यक्तमिति प्रकृतिरुच्यते।

49. प्रकृतिः किमर्थं प्रवर्तते ? चितो भोगापवर्गार्थं प्रकृतिः प्रवर्तते।

**ईश्वरविषये विभिन्नमतभेदाः**

50. योगमते/ सेश्वरसांख्यमते ईश्वरः कीदृशः? क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः पुरुषविशेषः भवेति ईश्वरः।

51. तार्किकाणां मते ईश्वरः कीदृशः ? ईश्वरः नित्यज्ञानप्रयत्नेच्छागुणानां समाहारः इति तार्किकाः मन्यन्ते। ईश्वरस्य असङ्गत्वम् नियन्तृत्वम् अयुक्तमिति तार्किकाः कथयन्ति।

52. हिरण्यगर्भाणां मते ईश्वरः कीदृशः? ईश्वरस्य नित्यज्ञानत्वम् आदिमत्वं च स्वीकारे सृष्टिरेव सदा भवेत्। अतः लिङ्गशरीरसमष्ट्यभिमानेन हिरण्यगर्भः ईश्वरः इत्युच्यते।

53. तात्पर्यलिङ्गानि कानि ? लिङ्गानि तूपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि

54. उपक्रमोपसंहारौ -प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनमुपक्रमोपसंहारौ । यथा छान्दोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्य अद्वितीयवस्तुनः "एकमेवाद्वितीयम्" इत्यादौ "ऐतदात्म्यमिदं सर्वम्" इत्यन्ते च प्रतिपादनम्।

55. अभ्यासः - प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनमभ्यासः। यथा तत्रैवाद्वितीयवस्तुनि मध्ये तत्त्वमसीति नवकृत्व प्रतिपादनम्।

56. अपूर्वता - प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुनः प्रमाणान्तराविषयीकरणमपूर्वता । यथा तत्रैवाद्वितीयवस्तुनो मानान्तराविषयीकरणम्।

57. फलं - प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्। यथा तत्र "आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येथ सम्पत्स्ये" इत्यद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनं श्रूयते।

58. अर्थवादः - प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनमर्थवादः। यथा तत्रैव "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इत्यद्वितीयवस्तुप्रशंसनम्।

59. उपपत्तिः -प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रुयमाणा युक्तिरुपपत्तिः । यथा तत्र "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् " इत्यादावद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते ।

60. का हृदयग्रन्थिः? सर्वे कामा हृदि आश्रिताः। अतः कामनाः हृदयग्रन्थिः इत्युच्यते। यदा हृदिश्रिताः कामना नष्टं भवति तदा ब्रह्मस्वरूपं प्राप्नोति।

61. कामः कः ? अहंकारचिदात्मानम् अविवेकेन सह एकीकृत्य इदं मे स्यात् इदं मे स्यात् इति इच्छा एव कामशब्दितः।

62. वैराग्यस्य हेतुस्वरूपकार्याणि कानि ? विषयेषु दोषदृष्टिः, जिहासा-विषयत्यगेच्छा, पुनर्भोगेष्वदीनता च त्रयोऽप्यमी वैराग्यस्य असाधारणहेतवः।

63. श्रवणादित्रयं किमर्थम्? अतत्त्वमिथ्याविवेचनम् ।

64. श्रवणादित्रयं- श्रवण- मनन- निदिद्धासनं च।

65. बोधोपकारिणौ कौ ? वैराग्योपरमावुभौ

66. चित्रपटदृष्टान्तेन परमात्मनः अवस्थाचतुष्टयं ससाधयतः।

67. आकाशदृष्टान्तेन आत्मनि चतुर्विधभेदाः विशदयत।

68. चिच्चतुर्विधा विशदयत।

69. विद्यास्वरूपम्।

70. आत्मविषये विप्रतिपत्ययः।

71. ईश्वरविषये विप्रतिपत्ययः।

72. अविद्यास्वरूपम्।

73. मायायाः स्वरूपम्।

74. आत्मनः चिदचिद्रूपत्वम्।

75. हिरण्यगर्भस्वरूपम्।

76. विराट् स्वरूपम्।(204-257)

77. ईश्वरस्य अन्तर्यामित्वम्। ईश्वरस्य सर्वेश्वरत्वम्।